सोन्मादमदमूर्च्छायाः सापस्मारापतानकाः ॥
यत्रैकः स्मृतिविभ्रंशस्तत्र सर्व्वमसाधु यत् ।
अयुक्तियुक्तमन्नं हि व्याधये मरणाय वा ॥
मद्यं त्रिवर्गधीधैर्य्यलज्जादेरपि नाशनम् ।
नाति माद्यन्ति बलिनः कृताहारा महाशनाः ॥
स्निग्धाः सत्त्ववयोयुक्ता मद्यनित्यास्तदन्वयाः ।
मेदःकफाधिकामन्दवातपित्ता दृढाशयः ॥
विपर्य्ययेऽतिमाद्यन्ति विस्रब्धाः कुपिताश्च ये ।
मद्येन चाम्लरूपेण साजीर्णं बहु नाति च ॥"
इति वाभटे निदानस्थाने षष्ठेऽध्याये ॥)
एतानि श्रुतिस्मृतिविरुद्धत्वाम्मोहनार्थानि शिष्टैः कदाचिदपि नाचरणीयानि ॥

मद्यद्रुमः, पुं, (मद्योत्पादको द्रुमः ।) माड़वृक्षः । इति राजनिर्घण्टः ॥

मद्यपङ्कः, पुं, (मद्यानां पङ्क इव ।) सुराकल्कः । मेया इति भाषा ॥ तत्पर्य्यायः । मेदकः २ जगलः ३ । इति हेमचन्द्रः । ३ । ५६८ ॥

मद्यपाशनं, क्ली, (मद्यपैरश्यते भुज्यते इति । अश् + कर्म्मणि ल्युट् ।) पानचणकभक्ष्यम् । तत्पर्य्यायः । उपदंशः २ अवदंश ३ चक्षणम् ४ । इति हेमचन्द्रः । ३ । ७१ ॥

मद्यपुष्पा, स्त्री, (मद्यानि मदसाधनानि पुष्पाण्यस्याः ।) धातकी । इति राजनिर्घण्टः ॥
(गुणादिविवृतिरस्या धातकीशब्दे ज्ञातव्या ॥)

मद्यमण्डः, पुं, (मद्यस्य मण्डः ।) मद्यफेनः । तत्पर्य्यायः । कारोत्तमः २ । इति हेमचन्द्रः । ३ । ५६६ ॥ कारोत्तरः ३ सुरामण्डः ४ । इत्यमरः । २ । १० । ४३ ॥

मद्यवासिनी, स्त्री, (मद्यानामिव वासो गन्धोऽस्या अस्तीति । इनिः ङीष् ।) धातकीवृक्षः । इति रत्नमालाराजनिर्घण्टौ ॥

मद्यबीजं, क्ली, (मद्यस्य बीजम् ।) नानाद्रव्यकृतसुराबीजम् । तत्पर्य्यायः । किण्वम् २ नग्नहूः ३ नग्नहुः ४ । इति हेमचन्द्रः । ३ । ५६६ । बाखर इति भाषा ॥

मद्यसन्धानं, क्ली, (मद्यस्य सन्धानमुत्पादनार्थं व्यायोजनम् ।) सुरासज्जीकरणम् । वंशाङ्कुरफलादीन् बहुकालं सन्धाय यत् क्रियते तत् । तत्पर्य्यायः । आसुतिः २ आसवः ३ अभिषवः ४ । इति हेमचन्द्रः । ३ । ५६६ ॥

मद्यामोदः, पुं, (मद्यस्येवामोदो गन्धो यस्य ।) वकुलवृक्षः । इति राजनिर्घण्टः ॥

मद्रः, पुं, (मन्दते इति । मदि मोदादौ + "स्फायितञ्चीति ।" उणा० २ । १३ । इति रक् ।) देशविशेषः । हर्षः । इत्युणादिकोषः ॥ तद्देशविवरणं यथा,—
"वैराटपाण्ड्ययोर्मध्ये पूर्व्वदक्षक्रमेण तु ।
मद्रदेशः समाख्यातो माद्रीशा तत्र तिष्ठति ॥"
इति शक्तिसङ्गमतन्त्रे ७ पटलः ॥
(भद्रे, क्ली । यथा, चतुर्थों चाशिष्यायुष्य मद्रभद्रकुशलसुखार्थहितैः । २ । ३ । ७३ । इत्यत्र सूत्रे । मद्रं देवदत्तस्यभूयात् । इति काशिका । मद्रभद्रयोः पर्य्यायत्वादन्यतरो न पठनीयः । इति सिद्धान्तकौमुदी च ॥)

मद्रकः, त्रि, (मद्रेषु जात इति । मद्र + "मद्रवृज्योः कन् ।" ४ । २ । १३१ । इति कन् ।) मद्रदेशभवः । इति सिद्धान्तकौमुदी ॥ (देशभेदः । यथा, मत्स्यपुराणे । ११३ । ४१ ॥
"गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः ॥")

मद्रकारः, त्रि, (मद्रं करोतीति । कृ + "क्षेमप्रियमद्रेऽण् च ।" ३ । २ । ४४ । इति पक्षे अण् ।) मद्रङ्करः । यथा क्षेमप्रियमद्रात् कुर्व्वेति मुग्धबोधव्याकरणम् ॥

मद्रङ्करः, त्रि, (मद्रं भद्रं करोतीति । कृ + "क्षेमप्रियमद्रेऽण् च ।" ३ । २ । ४४ । इति चकारात् खच् । मुम् च ।) मङ्गलकारकः । यथा क्षेमङ्करोऽरिष्टतातिः स्याच्छिवङ्करशङ्करौ । इति त्रिकाण्डशेषः ॥

मद्रसुता, स्त्री, (मद्रस्य सुता ।) मद्रराजकन्या । सा पाण्डुराजस्य द्वितीया भार्य्या नकुलसहदेवजननी च । इति शब्दरत्नावली ॥

मद्रगौणः, मद्रगौयः, मद्र्यः, } त्रि, (मद्रगस्यायमिति । "अशब्दे यत् खावन्यतरस्याम् ।" ४ । ३ । ६४ । इतिक्रमेण खछयत्प्रत्ययाः ।) मद्रगसम्बन्धी । इति सिद्धान्तकौमुदी ॥

मद्वा, [न्] पुं, (माद्यतीति । मद् + "स्नामदिपद्यर्त्तिपृशकिभ्यो वनिप् ।" उणा० ४ । ११२ । इति वनिप् ।) शिवः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (मदनशीले, त्रि । यथा, ऋग्वेदे । ८ । ८१ । १६ ।
"इन्द्राय मद्वने सुतं परिष्टोभन्तु नो गिरः ॥")
"मद्वने मदनशीलाय ।" इति तद्भाष्ये सायनः ॥

मधु, क्ली, (मन्यन्ते विशेषेण जानन्ति जना यस्मिन् । मन् + "फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च । उणा० १ । १८ । इति उः धश्चान्तादेशः । मद्यम् । (यथा, आर्य्यासप्तशत्याम् । ४२५ ।
"मधुमदवीतव्रीडा यथा यथा जपति सम्मुखं बाला ॥")
क्षीरम् । जलम् । इति विश्वः हेमचन्द्रश्च ॥ रसभेदः । मधुररसः इति यावत् । इति शब्दरत्नावली ॥ पुष्परसः । फुलेर मौ इति भाषा ॥ तत्पर्य्यायः । मकरन्दः २ । इत्यमरः । २ । ४ । १७ ॥ मरन्दः ३ मरन्दकः ४ । इति शब्दरत्नावली ॥ क्षुद्राभिर्मक्षिकाभिः कृतम् । मौ इति भाषा । क्षौद्रम् २ माक्षिकम् ३ । इत्यमरः । २ । १ । १७ ॥ माक्षीकम् ४ कुसुमासवम् ५ पुष्पासवम् ६ पवित्रम् ७ पित्र्यम् ८ पुष्परसाह्वयम् ९ । इति राजनिर्घण्टः ॥ माध्वीकम् १० सारघम् ११ मक्षिकावान्तम् १२ वरटीवान्तम् १३ भृङ्गवान्तम् १४ पुष्परसोद्भवम् १५ । इति भावप्रकाशः ॥ (तथास्य पर्य्यायः ।
"मधु पुष्परसं क्षौद्रं मकरन्दश्च माक्षिकम् ॥"
इति वैद्यकरत्नमालायाम् ॥

मधु तु मधुरं कषायानुरसं रूक्षं शीतमग्निदीपनं वर्ण्यं वल्यं लघु सुकुमारं लेखनं हृद्यं सन्धानं शोधनं रोपणं वाजीकरणं संग्राहि चक्षुःप्रसादनं सूक्ष्ममार्गानुसारि पित्तश्लेष्ममेदोमेहहिक्काश्वासकासातिसारच्छर्द्दितृष्णाकृमिविषप्रशमनं ह्लादि त्रिदोषप्रशमनञ्च तत्तु लघुत्वात् कफघ्नं पैच्छिल्यान्माधुर्य्यात् कषायभावाच्च वातपित्तघ्नम् ।
"बृंहणीयं मधु नवं नातिश्लेष्महरं सरम् ।
मेदःस्थौल्यापहं ग्राहि पुराणमतिलेखनम् ॥
दोषत्रयहरं पक्वमाममम्लं त्रिदोषकृत् ।
तद्युक्तं विविधैर्योगैर्निहन्यादामयान् बहून् ॥
नानाद्रव्यात्मकत्वाच्च योगवाहि परं मधु ॥"
तत्तु नानाद्रव्यरसगुणवीर्य्यविपाकविरुद्धानां पुष्परसानां सविषमक्षिकासम्भवत्वाच्चानुष्णोपचारम् ।
"उष्णैर्विरुध्यते सर्व्वं विषान्वयतया मधु ।
उष्णार्त्तमुष्णैरुष्णे वा तं निहन्ति यथा विषम् ॥
तत् सौकुमार्य्याच्च तथैव शैत्यान्नानौषधीनां रससम्भवाच्च ।
उष्णैर्विरुध्येत विशेषतश्च तथान्तरीक्षेण जलेन चापि ॥
उष्णेन मधु संयुक्तं वमनेष्ववचारितम् ।
अपाकादनवस्थानान्न विरुध्येत पूर्व्ववत् ॥
मध्वामात् परतस्त्वन्यदामं कष्टं न विद्यते ।
विरुद्धोपक्रमत्वात्तत् सर्व्वं हन्ति यथा विषम् ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)
अस्य सामान्यगुणाः । शीतत्वम् । गुरुत्वम् । स्वादुत्वम् । त्रिदोषव्रणनाशित्वम् । कषायानुरसत्वम् । रूक्षत्वम् । चक्षुष्यत्वम् । श्वासकासनाशित्वञ्च ॥ * ॥ तदष्टविधं यथा । पौत्तिकम् १ भ्रामरम् २ क्षौद्रम् ३ माक्षिकम् ४ छात्रम् ५ आर्घ्यम् ६ औद्दालकम् ७ दालम् ८ । एतेषां लक्षणानि यथा,—
"पिङ्गला मक्षिका ज्ञेया महत्यस्या च सा द्विधा ।
महती पुत्तिकानाम्नी स्वल्पा क्षुद्रेति कथ्यते ॥
मध्यमा मक्षिका नीला माक्षिकेत्यभिधीयते ।
पुत्तिकाभ्रमरक्षुद्रामक्षिकासम्भवं मधु ॥
पौत्तिकाद्युच्यते च्छात्रं वरटीच्छत्रसम्भवम् ।
तपोवने जरत्कारोरर्घ्यं मधुतरूद्भवम् ॥
औद्दालकन्तु वल्मीककारिकीटविनिर्म्मितम् ।
दालमित्यभिनिर्द्दिष्टं वृक्षकोटरकीटजम् ॥"
एतेषां वर्णा यथा,—
"माक्षिकं तैलवर्णं स्यात् घृतवर्णन्तु पौत्तिकम् ।
क्षौद्रं कपिलवर्णं स्याच्छ्वेतं भ्रामरमुच्यते ॥"
एतेषां गुणा यथा,—
पौत्तिकं तेषु वीर्य्योष्णं कषायानुरसान्वयात् ।
वातासृक्पित्तकृच्छ्रेदि विदाहि मदकृन्मधु ॥
"पैच्छिल्यात् स्वादुभूयस्त्वाद् भ्रामरं गुरु कीर्त्तितम् ।
क्षौद्रं विशेषतो ज्ञेयं शीतलं लघु लेखनम् ॥
तस्माल्लघुतरं रूक्षं माक्षिकं प्रवरं स्मृतम् ।